(शोध लेख नाम – मुण्डकोपनिषद्: व्यवहारपरा शान्तिशिक्षा)

282

ISSN 2249 – 8907

# VAICHARIKI

**A Multidisciplinary Refereed International Research Journal**

**Volume VII** **Issue 3** **September 2017**

***Chief Editor : Dr. Manoj Kumar***
*Department of Sanskrit*
*B.R.A. Bihar University*
*Muzaffarpur*

E-mail : vaichariki@gmail.com www.vaicharikibihar.blogspot.com

# मुण्डकोपनिषदः व्यवहारपरा शान्तिशिक्षा

*आचार्यः डॉ. बृहस्पतिमिश्रः,**

मानवजीवनस्यापि सर्वोत्कृष्टतत्त्वरूपेण शान्तिशिक्षा नरीनृत्यते। प्रत्येकम् उपनिषदः शान्तिशिक्षायाः किंचन दृश्यं वर्तते। आरम्भोऽपि उपनिषदां शान्त्या भवति समाप्तिरपि। शान्तिं विना सांसारिकाणि सर्वाणि अपि वस्तूनि व्यर्थानि परित्याज्यानि, न जीवने तेषां किमपि विशिष्टं महत्त्वम्।

अत्र हि प्राप्तेऽवसरे आदौ का नाम शान्तिरिति विचारयामः शम्–धातोः क्तिन्–प्रत्यये[1] कृते सति शान्तिशब्दः निष्पद्यते, यस्यार्थो भवति– "कामक्रोधादिप्रशमः, चित्तोपशमः, विषयेभ्यः इन्द्रियोपरमः " चेत्यादयः अर्थाः समपुलभ्यन्ते, तत्रैव शमः ,प्रशमः, उपशमः, प्रशान्तिः, तृष्णाक्षयः चेत्यादयश्शब्दाः अपि उपलभ्यन्ते। ये च जीवनस्य विशदम् आनन्दं दापयितुम् उचितजीवनयापनाय च महत्त्वपूर्णां भूमिकां निर्वहन्ति।

एवं च हेमचन्द्रः शान्त्याः लक्षणं लिखति–

"यत्किञ्चिद्वस्तु संप्राप्य स्वल्पं वा यदि वा
बहु या तुष्टिः जायते चित्ते शान्तिः सा गद्यते बुधैः"

अर्थात् चित्तस्य तुष्टिः एव शान्तिः वर्तते।

तच्च देवीभागवतेऽपि लिखितमस्ति –

"उत्पत्तिस्थितिनाशेषु रजादित्रिगुणा मता ।
सर्वज्ञा सर्वनेतृत्वात् शान्तित्वात् शान्तिरुच्यते ।।"

एवं रूपेण सर्वत्रापि वेदेषु स्मृतिग्रन्थेषु पुराणेषु च विभिन्नस्थलेषु शान्तिशिक्षा यथाक्रमं प्रतिपाद्यते वर्ण्यते च। शान्ति– पाठेनैव अस्या उपनिषदः समारम्भो समाप्तिश्च जायते तच्च–

**ओ३म् भद्रं कर्णेभिः शृणुयाम देवा
भद्रं पश्येमाभिर्यजत्राः।
स्थिरैरङ्गैस्तुष्टुवांसस्
तनूभिर्व्यशेम देवहितं यदायुः।।
ओ३म् स्वस्ति न इन्द्रो वृद्धश्रवाः
स्वस्ति नः पूषा विश्वदेवाः।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः
स्वस्ति नो बृहस्पतिर्दधातु।।"[2]**

अर्थात् – वयं यजत्राः सन्तः कर्णेभिः भद्रं शृणुयाम, भद्रपदमेव शान्तेः द्योतकमस्ति यतः कल्याणेनैव चित्ते तुष्टिः जायते सा चित्ततुष्टिरेव शान्तिः वर्तते।

तद्वद्देव द्वितीयं वाक्यमपि उपकरोत्येव यथा हि –"अक्षिभिः भद्रं पश्येम" नेत्राणि अपि कल्याणमेव पश्येयुः अर्थात् मनसः चित्तस्य वा तुष्टिरेव द्योत्यते इति। तृतीये वाक्ये च स्थिरैः अङ्गैः तनूभिः तुष्टुवांसः यत् आयुः देवहितम् तत् पश्येम" स्पष्टमेव स्तुतिं वयं परमात्मः उपभोगं कुर्याम इति अत्रापि शान्तेः वन्दनमेव प्रतीयते एव।

अन्यच्च वाक्यमस्ति– "वृद्धश्रवाः इन्द्रः नः स्वस्ति दधातु" अर्थात् कीर्तियुक्तः इन्द्रः अस्माकं स्वस्ति दधातु कल्याणं करोतु इति अत्रापि स्वस्ति इति कल्याणकरणमेवास्ति। "विश्ववेदाः पूषाः नः स्वस्ति दधतु" अत्रापि कल्याणमेव निहितमस्ति इति। "अरिष्टनैमिः तार्क्ष्यः नः स्वस्ति दधातु ।"

तद्वदेव "बृहस्पतिः न स्वस्ति दधातु" इति अर्थात् सर्वेऽपि देवाः कल्याणं पोषयन्तु इति मङ्गलपाठः क्रियतेऽनेन स्पष्टं भवति यत् मङ्गलद्वारैव सम्पूर्णस्यास्य विश्वस्य आकांक्षा शान्तिविषयिणी एव।

---

* प्रवक्ता– श्रीशक्तिसंस्कृतमहाविद्यालयः, श्रीनयनादेवीजी, बिलासपुरम् (हिमाचलप्रदेशः)